No. १४५३

Title जागदीशी सत्प्रति पक्ष ग्रन्थः

Author म.म. जगदीशः

Extent ८१ Age

Subject न्यायशास्त्रं

ज्ञानदीपी सत्प्रतिपद्धसंग्रहः

१४५३

तद्विरोधिवोधकान्यपदं लिंगस्यानुमितिजनकत्वादव्याप्तेरावृत्तिव्याप्तेश्चाग्रिमलक्षणस्यापि प्रतिरुद्धकार्यक त्वादा

त्वदवक्ष्यामि च इष्टप्रतिबध्येति मूले उभयोरित्यस्य हेत्वोरित्यर्थः ज्ञानयोरिति विश्वमावेक्कतयाच एकदाक्रमि त्यत्र

क्रयोर्वादिहेतुद्वये व्याप्तिपक्षधर्मतया ज्ञानयोः प्रतिपक्षत्वादित्यर्थः दीधितौ साधकमानादित्यादिपदेन विरो

धिपरामर्शसाम[illegible]ग्र्यात्रापि साध्यानुमितिविरोधित्वात्तदुपग्रहः द्वितीयपरामर्शस्यो[illegible]त्तरकालपूर्व तेनैव

धर्मिनानुमितेः प्रतिरोधसंभवादाह। क्षणमिति ननु स्वपर इत्यादिमूलेन युयुत्सन्नयोर्विरोधिपराम पद्

र्शयोः परार्थस्थले प्रतिपक्षत्वव्यवस्थापनेप्याशंकिते क्रमोत्पन्नयोस्तथात्वं नोपपादितमेवेत्यतो

ए भावमाह अयमिति सर्वथैवेति समयबंधं विनेत्यादिं आधिक्यप्रसंगादिति आधिनिग्रहस्थानप्रसं व्याख्य

इ [illegible]दित्यर्थः साधनद्वयेपि वदूषणद्वयेप्याकांक्षाविरहस्य विशिष्टत्वात् तयोरधिकस्मिन्येव स्था चा

नु पनाहेतौ प्रतिवादिना व्याप्त्यादिविरहोद्भुपन्यासंभवान्नतस्पव्या। व्याप्त्यादिकं प्रतिवादिसिद्धमितित

१

रुद्रुत्तस्य २

स्य बाधकत्वायोगात् पदार्थस्थलेपि क्रमोत्पन्नयोर्विरोधिपरामर्शयोः प्रतिपक्षविषयादोषत्वं नैसंभवत्येवेति भावः ननु कार्यानुत्पादरूपस्य प्रतिबंधकत्वानेनव्याप्त्यादिमंगज्ञानोपजीव्यं नवा तथात्वेपि विरोधिपरामर्शयो दोषत्वसंभवदूषणत आह प्रतिरोधप्रयोजकेति ननु मिथो विरुद्धयोः साधनयोरेकत्र निश्चया संभवे प्रागुक्तत्वादुभयोरेकत्र निश्चयासंभवश्च प्रागुक्तत्वादुभयोरेकत्र निश्चयो ... त्तर मिसाध्य संगतमत आह परस्पराभावेति तदग्रहेत्वेति हेत्वोः परस्पराभावव्याप्यत्वाद्यग्रहेत्वेत्यर्थः तथा च तद्ग्रहस्य सत्वासत्वाभ्यामेव शंकासिद्धांतानेति भावः विरोधिसामग्र्याः सत्वे साध्यविरोध्यनुमित्यनुत्पत्तिनस्यैव स्यात् तयासत्प्रतिपक्षस्यैव न संभवतीत्यतो विरोधिसामग्रीप्रतिबंधेनेत्यत्र सामग्रीपदमसाधारणकारणपरं वाच्यमित्याशयेन व्याचष्टे विरोधीत्यादि तस्य विरोधिपरामर्शस्य स्वरूपसतो व्याप्त्यविरहस्य दोषत्वे व्यभिचारिहेतुकानुमितिः कदापि न स्यात् अत आह तेनेति विरोधिपरामर्शेन ज्ञाप्यमानस्येत्यर्थः

बो
स्य
ए

हरं ब०

नुषज्यते

५ इत्थं च मूलेपि व्याप्तिपक्षधर्मताविरहे यैव सत्य ज्ञायमान इति शेषः विरहस्येति विरोधित्वं कल्पयति सैवार्थः तस्य
विरोधिपरामर्शस्य सत्वे तौ च व्याप्त्यादिविरहस्यासंभवादिति भावः पक्षधर्मताभंगानुत्तस्यामूलत्वस्य न्यूनता
पत्तिनत्वामपाकुर्वन्नाह व्याप्त्यादितितथा च मूले व्याप्तिभंगे सत्र व्याप्तिपदमनुमितेर्पर्यायीकपरमिति
भावः अनास्थायां हेतुमाह प्राथमिकेति विरोधिपरामर्शाभ्यां व्याप्त्यादिभंगकल्पनादशायामप्यनुमितेः ते
रतुल्यत्यायर्थप्रामिकेन साक्षादनुमितिप्रतिरोधेनैव तयोर्दूषकत्वादि सार्थः ननु साक्षाद्दूषकत्वं न व्या
पारद्वारा दूषकत्वस्य वाधकं द्वयोः समावेशे क्षत्यभावादत आह परमुखेनेत द्विषयस्येति विरोधिपराम
र्शविषयस्येत्यर्थः अयोगादिति अनुमितेस्तत्कारणज्ञानस्य वा साक्षाद्विरोधिनस्यैव हेत्वाभासत्वादन्यथोपा
धेरपि तथात्वापत्तेरिति भावः चक्षुरित्यादि मूलस्यार्थान्तरानिराकुर्वन्नाह नन्विति विशेषस्या प्रातत्वा
द्य घभाव व्याप्यस्यैदर्शनइत्यर्थः अमइत्युपलक्षणं लौकिकस्यापि तद्धेतोप्रत्यक्षस्य तदभावविशेष

स्य

दृ ति त्वं

याशा०

दर्शनदशायामनुपपत्तिरित्याशङ्क्याननुविरोधिपरामर्शदशायां तद्धर्त्तौ स्या बाधादिबोधस्य वानुत्पत्त्या चकारस्य शब्दा
दिप्रमाणसमुच्चायकत्वेनुपपत्तिरत आह चास्त्विति मूले तदुपस्थितावपीति विरोधिव्याप्यवत्त्वोपस्थि
तावपि फलस्य तद्वत्ताप्रत्यक्षस्य दर्शनात् तस्य चक्षुरादेरधिकबलवत्त्वात् तद्वत्ताप्रत्यक्षप्रतिबंधकास
मवहितत्वादित्यर्थः तथाच दोषविशेषाघजन्यबुद्धिं प्रत्येव विरोधिपरामर्शत्वेन प्रतिबंधकत्वमिति भावः मूले
धि प्रतिरोधकत्वे विरोधिधीजनकत्वे लक्षणायोग इति वादिवाक्यजन्योपस्थितेरनुमितिरूपकार्यप्रतिबंधकत्वे स्थि
तत्र नैयायिकोक्तसत्प्रतिपक्षलक्षणस्यायोग इत्यर्थः ननु तदभावलिंगकत्वेनागृहीतस्यापि तदभावग्राहकप्र
त्यक्षादिप्रमाणस्य स्वतन्त्रस्य तद्वत्तानुमानप्रतिरोधकत्वात् लिंगभावेनैवस्पेवकारस्य संगतिरतं कथा स्यात्
थ अभिप्रायेण मूलं योजयति नु माह दिधितावै व्याप्तिस्यादिप्रत्यक्षादेरित्यादिपदेन तदभावग्राहकवाक्योप
ग्रहः तत्र प्रत्यक्षादेरिति तथाच हृदे नैव वह्निमान् न वह्न्यभावग्राहकप्रत्यक्षेण तादृशवाक्येन वा बाधेतु हेरेव०

प्र.मा०

पन्यासस्थले। लिंगाभावेनैव प्रसक्षादेरनुमानप्रतिरोधकत्वमतो नासंगतिरितिभावः अत्र। लिंगाभावेन प्रति
रोधकत्वेदृष्टं च मूले तदुपन्यासानर्हत्वादित्यत्र नस्य। लिंगभावानापन्नप्रत्यक्षादिकथायामुपन्यासा
नर्हत्वादित्यर्थः ननु तदभावव्याप्यस्येव तदभावग्राहकप्रत्यक्षस्यापि विरोधिसामग्रीत्वाविशेषाल्लिंग
भावं विनापि तदुपन्यासे बाधकाभाव इत्यत आह प्रत्यक्षस्येति बोधकत्वात् विरोधिबोधकत्वात् तथा
च यस्य ज्ञानस्याविरोधिसामग्रीत्वं कुप्तदृत्पाकांक्षानुरोधात् तदेकवेथायामुपन्यस्यते विपरीतया
स्य प्रत्यक्षं तत्वं च ज्ञानसंबन्नतयेत्युपन्यासानर्ह इतिभावः नन्वेवमपि विपरीतार्थकवाक्यस्य ज्ञानस्ये
व विरोधिधीसामग्रीत्वात्तस्येव लिंगभावं विनाऽपन्यासार्हत्वसंभवात् मूलस्येव कारासंगतिरेवेत्यत
आह विरोधिति मात्रपदेन पदार्थोपस्थित्यादिव्यवच्छेदः तथा च ज्ञानस्यापि विपरीतार्थकवाक्यस्य पदार्थोप
स्थित्याद्यभावदशायां विरोधिधीसामग्रीत्वाभावान्न तन्मात्रस्यानुमितिविरोधित्वमिति। लिंगभावेने
पदार्थोपस्थित्या

स१

वतस्योपन्यस्तस्य तथात्वं वाच्यमितिभावः ननु तथापि पदार्थोपस्थित्यादिसहकृतानामेव ज्ञातविरोधिवाक्यानां वि
विरोधि परीतार्थस्य शाब्दं न तो मानसं वा बोधसामग्रीत्व संभवात् विनापि लिंगभावं तेषामुपन्यासे बाधकाभाव इत्य
त आह बोध्याभावेति विरोधिवाक्यस्य यद्बोध्यं तदभावव्याप्यवत्तानिश्चये तेनैव स्यापनं जनितेनैव विरोधि स्य
वाक्याधीनस्य शाब्दादिबोधप्रतिरोधाच्चेत्यर्थः तथा चोक्तक्रमेणापि विपरीतवाक्यस्य न विरोधित्वसामग्री
त्वमितिभावः ननु विशेषदर्शनदशायां प्रामाणिकसंशयस्यानुत्पत्त्या संशयत्वावच्छिन्नं प्रत्येव व्याप्यदर्श
नाभावस्य हेतुत्वकल्पने द्विरोधिव्याप्य[illegible]प्रवत्तानिश्चयसत्त्वे संशयाकारानुमितिस्वीकारे रत्नकोशक
तामनुचितमित्यत आह रत्नकोशेत्यादि विरुद्धानेकप्रकारकत्वघटितस्य संशयत्वस्य जन्यतावच्छेदकत्वे
अविरोधानेकप्रकारकत्वस्यापि तथात्वं स्यादित्यत आह एकधर्मिकेत्यादि एकधर्मिकत्वघटितस्य
संशयत्वस्यावच्छेदकत्वे नानाधर्मिकत्वघटितस्यापि तथात्वं स्यादित्याह नानाधर्मिकेति ज्ञानत्वादित्या हे१०

दिपदेन नाना धर्मिकैकप्रकारकत्वादेः परिग्रहः न जन्यतावच्छेदकमिति तथा चोक्तकार्यकारणभावविरहादनु
मितेः संशयत्वं नानुप[illegible]पन्नमिति भावः तानत्वप्रयोजकेति तादृशज्ञानत्वावच्छिन्ननियामकेत्यर्थः सहजस्य
संशयत्वघटकधर्माणामेवाऽनस्य ननु विरोधसंसर्गेणोभयप्रकारकत्वलक्षणं संशयत्वमवश्यं कारणानि
यम्यमतत्राह क्वचिदिति तत्प्रयोजकं विरोधमानप्रयोजकं तथा च विरोधमविषयीकृत्यापि। संशयो[illegible]
त्पादात्तज्ज्ञानार्थं न संशयत्वं जन्यतावच्छेदकमिति भावः ननु तथापि तद्विधेयकनिश्चयाकारानुमितित्वाव
च्छिन्नं प्रत्येव तद्व्याप्यवत्तानिश्चयत्वस्य हेतुतादनुमितेः संशयत्वस्वीकारो दुर्घट इत्याह नीलेत्यादि
तदभावप्रकारकेतरत्वघटितस्य तन्निश्चयत्वस्य जन्यतानवच्छेदकत्वे भेदघटितत्वेनीलेतरघटत्वं दृष्टान्तः
तदप्रकारकत्वघटितस्य तदभावनिश्चयत्वस्य जन्यतावच्छेदकत्वे दृष्टान्तमाह घटत्वाप्रकारकज्ञानत्वेति विरुद्धो
भयप्रकारकज्ञानात्मकसंशयत्वघटितस्य निश्चयत्वस्या[illegible]नवच्छेदकत्वे तु स्वसदृशं दृष्टान्तमाह ए

५

क धर्मिके त्यादि तत्त्वे तदभावप्रकारकत्वादिविरहादीत्यादि नत्तद्दोषोपग्रहाः एवं चेति निश्चयत्वस्य जन्यतावच्छेद
कत्वे चेत्यर्थः ननु संशयमात्रस्यैव साक्षात्कारत्वनियामकतत्सामग्रीविरहे कुतः संशयानिकानुमितिरत
आह अत एवेति आहत्येति समानेत्यादि सन्नस्वरत्वादिप्रतिपत्तिवाक्यतः शाब्द एव संशयो न तु प्रत्यक्षपदा
र्थोपस्थितिसनन्तरं मानस इति शब्दसंशय एव व्यभिचारादुक्तनियम एव नास्तीत्यर्थः ननु सामग्र्यास्तुल्यफल
त्वं दुर्वचमतोऽन्यफलत्वादिकमिव तदपि फलगर्भं वाच्यमित्याह फलबलेति भ्रमसामग्र्या बलवत्त्वं दर्शयन्ना
हासत्तीति विलत्त्वस्यैवेति नयनेनग्रहादित्यन्वयः चक्षुः पित्तवशेनः शुक्लप्रकारकसामग्र्यान्यूनबलत्वा
दिति भाव प्रमासामग्र्या आधिक्यफलत्वं दर्शयन्नाह असत्तीति दोषविशेष इति पूर्वेणान्वयः शुक्लत्वस्ये
वेति दोषात्मककारणविरहेणापि तत्त्व भ्रमसामग्र्या हीनबलत्वादिति भावः अनुमिताविवान्यत्रापि सा
मग्र्यास्तुल्यबलत्वं यन्नाह दूरस्थेश्चेति कोद्योरितिपीतादिनामिव विशेषदर्शनस्यापि अधिकबलत्व सं हेरंबः

दकत्वं दर्शयन्नाह सचेति एककोटीसंदर्शने सति तत्कोटेरेव नयनेन ग्रहणादित्यर्थः नचोभयकोट्योर्विशेषदर्शने
सति तयोर्नायनोपि संशयः स्यादिति वाच्यं तादृशफलादर्शनेन तत्र सामग्र्योः समबलत्वाकल्पनादिति भावः ननु
संशयस्य साक्षात्कारत्वानियमे स्मृतिरपि संशयः स्यादित्याशंकते अथैवमिति विरोधिनि॥ एकधर्मिकत
त्तदभावप्रकारकसंस्कारान्यामित्यर्थः॥ नचोद्बोधकानां विशेषस्यैव स्मृतिहेतुत्वादेकधर्मिणि तत्तदभावयो
रेकदोद्बोध एव संस्कारस्यासंभवादिति वाच्यं यस्य पुंसा समानधर्मिकतत्तदभावचाक्षुषसामग्र्योरि
व समानधर्मिकतत्तदभावगोचरस्मृतावनुगतस्वरूपाभ्यां उद्बोधकस्य हेतुत्वं तत्रैव विरुद्धसंस्कारयोरेक
दोद्बोधसंभवादिति भावः उत्तरयति निर्निन स्यादिति अनुभविकत्वे स्मृतेः संशयत्वमिष्टमेव न द्बाधके
उभयकोट्योर्विशेषदर्शनेन दशायामेकधर्मिके तत्तदभावः चाक्षुषसामग्र्योरिव समानधर्मिकतत्तद
भावः स्मृतिसामग्र्योरपि मिथो विरोधित्वं कल्पमिति भावः अनुभवबाधस्तु तयाप्यु च्यत इत्याह येनेति नि
श्चयत्वेन हेतुत्वोक्त्याव प्यनुगतोद्बोधकस्य त्वे स्मृति संशयत्वं वारणा संभवात् सोपहास माह उपे

5

5

यतेभवतेति मूलोक्तं सिद्धांतं निरसितुमशंकते अथेति प्रतिबंधकइति॥ अन्यथा बाधनिर्णयेप्यनुमित्सापत्तेरितिभावः
ननुविरोधित्वंयदितद्धटिताग्रहविरोधिधीविषयत्वंतदा विरोधिव्याप्यवत्तायास्तदसिद्धमतआह विरोधित्वंचे
वस्तुतइति वस्तुगत्ययत्साध्यविरोधितन्निश्चययोयदि प्रतिबंधकइत्यर्थः तादृशस्यसाध्यविरोधिनः विरोधित्वे
नेतिनिर्णयस्तत्रैवानुषज्यते तदग्रहे विरोधित्वाग्रहेनेहसाध्यमिति नचैवंसाध्याभावव्याप्यव्याप्यवत्त्वा
दिभ्रमेपि तन्निश्चयसाध्यवत्ताबोधविरोधिस्यादिति वाच्यंअप्रमाणपादेरिव अव्याप्यवृत्तित्वादेरपि ज्ञान
स्योत्तेजकत्वादितिभावः तदनंतरमितितदभावव्याप्यवत्तानिश्चयोत्तरं नतस्यभ्रमः संशयोवेत्यर्थः नतावद्वि
शिष्टधीसामान्येविशेषदर्शनत्वेनप्रतिबंधकत्वं किंतुप्रत्यक्षादितत्तद्विशिष्टबुद्धिव्यक्तिष्वेवतच्चानुमितेसंश
यत्वेनबाधकमितिसाशयेनसत्यपिपित्तादिशुक्लत्वादितिपीतत्वाद्यभावेत्यर्थःपीतत्वादेरितियहादित्सत्रेन्वयः४
ननुप्रमात्मकएवविशिष्टधीसामान्यविशेषदर्शनंविरोधिवाच्यमित्युक्तेभ्रमस्यतत्सत्वेप्युत्पादेनक्षाति
करइत्यतआह॥ अदुष्टेनचेतिपीतत्वादिनिश्चितत्वाद्यभावेत्यर्थः नन्वेवंप्रत्यक्षान्यविशिष्टधीसामान्यंप्रत्ल हेरंबं०

वस्तु विशेषदर्शनं विरोधित्यत आह सतीति चेतिन नु लौकिकसंनिकर्षजन्यविसिष्टधी सामान्यं प्रत्येव तस्य विरो
धित्वं वाच्यं तच्चोपनीतमानसाधारणमेवेत्यत आह। दूरत्व इति दूरत्वदशायां अप्रमितस्येंद्रियसंनिकृष्टस्या
पि स्थाणुत्वादे स्थाणुत्वाद्यभावव्याप्यकरादिप्रकारेण शाखादिमत्ताभ्रमे धर्मिणो ग्रहणादित्यर्थः इदमु
पलक्षणं सत्यपि चक्षुःसंनिकर्षे तदभावव्याप्यवत्ताभ्रमदशायां मलिनसंसर्गाभावे सत्यस्य नयनेनाग्रहणा
दित्यपि द्रष्टव्यं अनुगतेत्यस्य विशिष्टधितदभावविशेषदर्शनाभावयोरित्यादिः दोषविशेषादित्यादिना दूर
त्वादिदोषनिराकृतलौकिकसंनिकर्षस्योपग्रहः तदभावविशेषः दर्शनदशायां तद्वत्तासंस्कारस्योद्बोधेऽप्र
माणमावाद्गृहीत कदाचिदितिवस्तुतोऽनुभवत्वजातौ मानाभावादनुगतरूपेणोद्बोधकस्य हेतुतास्थल एव
स्मरणेऽपि विशेषदर्शनस्य विरोधित्वसंभवाच्च पूर्वकल्प एव सम्यगित्याशयेन कदाचिदित्युक्तं तथैव विशे
षदर्शनं विरोधीत्यर्थः सामान्य दोषविशेषाद्यजन्यविशिष्टधीसामान्यमनूदि। प्रवृत्ताव्यभिचारकत्वाद्

६

6

षविशेष्यजन्यप्रत्यक्षत्वमेवविशेषदर्शनस्यप्रतिबध्यतावच्छेदकं न तु तादृश। ज्ञानत्वमनुमितौ संदिग्धव्यभिचारकत्वादत्र
आह बोध्याभावेति शाब्दधियि योग्यताज्ञानादिमत्वेपित्यादि तथा च लाघवादिप्रतिसंधानश्रन्याया एव व्यभिचा
रशंकायाः कारणताधिपरिसंधिधित्वात्संदिग्धव्यभिचारकेनापि विशिष्टबुद्धित्वेनैव प्रतिबध्यत्वाघवान्नत्
तादृशप्रत्यक्षत्वेन शाब्दोपमित्यादौ प्रतिबध्यप्रतिबंधकभावांतरकल्पनागौरवप्रसंगादिति भावः न च यत्र
पर्वतत्वसामानाधिकरण्येनैव वह्नेस्तदभावस्य च व्याप्यवत्तापरामर्शस्तत्रोन्मत्तेपि पर्वतो वह्निमान्न वेत्या
कारा संशयानुमितिर्द्वारा पर्वतत्वावच्छेदेनैव विरोधिपरामर्शस्य विशिष्टधिप्रतिबंधकत्वादिति वाच्यं ध
र्मितावच्छेदकीभूतपर्वतत्वावच्छेदेन विरुद्धोभयप्रकारकज्ञानस्यैव संशयत्वात्तादृशज्ञानसामग्र्या विर
हेण पर्वतत्वोपलक्षितेन वह्नितदभावयोः समूहालंबनानुमितेरेव तत्रोत्पादात् इदं तु चिंत्यते यत्र पर्व
तत्वावच्छेदेनैवाभावः व्याप्यावत्त्वस्य तद्व्याप्यवत्त्वस्य च समूहालंबनपरामर्शोत्तरं वाह्न्यभावेतराभावत्वस्य हेरंब·

वह्नित्वरद्रव्यस्य च परत्वे बाधनिश्चयतत्रेतरबाधवशाद्ध्रूमाभावस्य वह्नेश्च अनुपलभ्यमाने स्याकारामल्लि
कृन्मतेपिदूर्वारालस्माद्विशेषबाधघटितयोग्योरपि मिथो विशिष्टबुधिविरोधित्वान्तरं कल्पनीयमिति भावः तत्र च इति
दोषविशेषाणां लौकिकसंनिकर्षविशेषाणां चाननुगमाद्दोषविशेषादिजन्यतत्तद्बुधिव्यक्तीनां भेदवत्वं तद्धा
च्यं तथाच तावद्भेदानां विशिष्यविशेषसाभावे विनिगमनाविरहादनंतप्रतिबध्यप्रतिबंधकभाव — — स्यप्र
त्तिस्विक रूपेण प्रत्यक्षादित्तत्तद्विशिष्टबुद्धिव्यक्तिषु तत्तद्विशेषदर्शनत्वे प्रतिबंधकत्वंकल्पतामवच्छेदकलाघवा
दित्यनुमितौ तस्य विरोधित्वे मानाभावा: अथ साक्षात्कारत्वानिरुपिततंनिष्ठप्रकारताकबुधिंप्रत्येव तदभाव
व्याप्यवत्तानिश्चयत्वेन विरोधित्वसाक्षात्कारित्वानिरूपिता च विषयता लौकिक इव/व दोषविशेषजनेपि
प्रत्यक्षे अनुगतैव रजतत्वइव शुक्तावपि रजतत्वस्य दर्शने रजतं साक्षात्करोमि त्यनुभवाल्लौकिकस्येव
दोषविशेषजन्यस्यापि वचिराद्युपादानप्रत्यक्षस्य यागादिगोचरप्रकारताजनकतात्त्वदवच्छेदकत्वेनैवहि

१६

लक्षणतादृशविषयतासिद्धेश्चेति चेन्न सति विरोधिव्याप्यदर्शने बुभुत्सया सित द्धत्वोपनीतप्रसक्त्यानुत्पत्तिप्रसंगात् न चानाहार्यतादृशबुद्धित्वेनैव प्रतिबध्यत्वं आहार्यत्वस्यानुगतस्य दुर्वचत्वात् तदवच्छिन्नभेदस्य प्रति निवे[illegible]शायोगात् बुभुक्षाकालीनतत्तद्विशिष्टबुधिनां प्रसक्तभेदस्य निवेशे च तेषां विशिष्याभावादेव गुरुतरानंतप्रतिबध्यप्रतिबंधकभावापत्ति तादवस्थ्यात् आससामपि बुभुत्सायां तत्कालीनां बुभुत्सा व्यक्तिनां विरोधि परामर्शदशायां सामग्रीतः समुत्पत्ति प्रसंगाच्च तत्तद्बुधौ बुभुत्साकालीनां हेतुत्वकल्पने चातिगौरवात् न च यद्यद्बुभुत्सासत्वेन दभावपरामर्शदशायां तद्वत्त्वबोधस्तत्तद्बुभुत्साभावकूटविशिष्टतदभावपरामर्शत्वेनैव साक्षात्त्वानिरूपितत[illegible]प्रकारताकधिसामान्यप्रतिबंधकत्वमिति वा सर्वपत्रे पेक्षाबुध्यात्मकस्य साध्याभावपरामर्शस्योत्तरं क्रमेणासाध्यस्य बुभुत्सा परामर्शौ तत्रोत्तरकालं साध्यशोपनीतभानुत्पत्तिदशायां त्वन्मते प्यनुमानत्ते साध्यस्योपनीतभानसामग्री अनुमितिसामग्रीतो हि न बलवत्त्वात् इच्छाघटितसामग्रीत्वेन कथंचिद्बलवत्त्वे प्रतिबंधकदिशेवतावद्बुभु

हेदंबु

क्षाविरहाणां विशेष्यविशेषणभावव्यत्यासेन गुरुतनंतप्रतिबध्यप्रतिबंधकभावापत्तितादवस्थ्यात् नचतावद्बहुमु
क्षाविरहविशिष्टतद्भावपरामर्शत्वावच्छिन्नाभावस्यापखंडस्यतत्तद्व्यक्तित्वेनैवतद्वत्ताबुधिहेतुत्वान्नतद्गौ
रवमितिवाच्यंप्रतियोगिविनाकृतस्याखंडाभावस्यतत्वेनहेतुतायामन्यथासिद्धेरन्यत्रव्यवस्थापितत्वात्
विशिष्टाभावस्यविशेषणाद्यभावात्मकत्वेनअखंडत्वासंभवाच्च अथप्रत्यक्षस्थलेविशेषणतयएवास्तुवि
रोधित्वंविशेषदर्शनस्यविरोधिपरामर्शदशायांतद्वत्तायाःशाब्दोपमितिस्मृतीनांअनुसस्सातत्तत्प्रकारकप
रोक्षत्वावच्छिन्नंप्रत्येवतद्भावपरामर्शत्वेनविरोधित्वंवाच्यं नतुशाब्दत्वाद्यंतर्भावेनगौरवादित्यनुमिते४
संशयपक्षतासंभवापूर्वेतादृशेवह्न्याद्यभावपरामर्शदशायांवह्निमत्सर्वतत्वावच्छिन्नेपदवाच्यत्वोपमितेरनु
सस्सातस्याअपिविरोधिपरामर्शप्रतिबध्यत्वात् परोक्षत्वंचजातिविशेषः बाधनिर्णयप्रतिबध्यतावच्छेद
कत्वेनैवसिद्धशाब्दादिसाधारणानुभवत्वजातेःप्रमाणाभावेनतत्सांकर्यासंभवादितिचेन्न अनुमितिसाक्ष

ष्टदशायां ज्ञानांतरानुत्पत्त्या तत्प्रतिबध्यतावच्छेदकत्वेन सिद्धया जात्यासांकर्ये पापक्षरोक्तत्वजात्यसंभवान
च्च सत्सामग्र्यनुमितिसामग्र्यां शाब्दोपमितिप्रत्यक्षादीनां प्रत्यक्षमात्रबुभुत्सायां तस्य सैकस्यैवोत्पत्त्या
प्रत्यक्षादिप्रत्यक्षबुभुत्साविरहविशेषानुमितिसामग्र्या प्रत्यक्षत्वाद्यप्रत्येकधर्मावच्छिन्नं प्रत्यवविरोधि
त्वमिति वाच्यं प्रत्यक्षादिप्रत्यक्षबुभुत्सासत्वे अनुमितिसामग्री प्रति[illegible]विजातीयज्ञानोत्पादेति प्रत्यक्षादिप्र
त्यक्षबुभुत्सायाः प्रत्यक्षादिप्रत्येकाविरोधित्वादेवोक्तनियमोपपत्तेः सर्वमत एव बुभुत्साघटितसामग्र्या बल
त्वोपगमात् वस्तुतो नुमितिभिन्नं विजातीयं वा ज्ञानं प्रति पक्षताविशिष्टव्याप्त्यादिपरामर्शत्वपर्यवसितेन
अनुमितिसामग्रीत्वेन सर्वमत एव विरोधित्वं वाच्यं तथा च सोंदडमते प्रतिपक्षस्थलेपि संशयातिकारणा
अनुमितिमितेरेव स्वीकारात् पक्षतादिविशिष्टव्याप्त्यादिपरामर्शस्वरूपाया अनुमितिसामग्र्याप्रतिबंधकता
दृतनदानीं न ज्ञानांतरोत्पादः चिंतामणिकृतां तु सत्सपि पक्षतादिसहकृतव्याप्त्यादिपरामर्शे प्रतिपक्षस्य

हेरंब०

त्वे घटादेमानसादिज्ञानोपगमात् पक्षतादिभिरेव विरोधिपरामर्शाभावेनापि विशिष्टमेव नह्यादिपरामर्शत्व

न्य मनुमित्सेधिप्रतिबंधकतावच्छेदकंत्वं वाच्यमिति नानाविध विरोधिपरामर्शाभावकूटस्योत्तेजकतागौरवादि

ति संशयात्मकानुमितिस्वीकर्तुमुचितेति यत्तु विरोधिपरामर्शस्यानुमित्यप्रतिबंधकत्वे यत्र साध्याभावप

रामर्शकालीनेषु साध्यपरामर्शसहस्रेषु विशिष्याप्रामाण्यज्ञानं तत्रापि तेभ्यः साध्यानुमितिप्रसंगः तत्तद

प्रामाण्यज्ञानव्यक्तित्वेन साध्यानुमितिविरोधित्वे च अनंतप्रतिबध्यप्रतिबंधकभावापत्तिरतः तत्रैव साध्यानु

मितिसामान्यं प्रति साध्याभावव्याप्यवत्तापरामर्शत्वेनानुगतरूपेण प्रतिबंधकत्वकल्पनानलत्रान्नुमिति

शंशयाकारेति नच साध्याभावपरामर्शस्याप्रामाण्यज्ञानदशायां साध्यानुमित्युत्पादेन तत्तदप्रामाण्य

ज्ञानभावकुटविशिष्टसाध्याभावपरामर्शत्वेन विरोधितायावाच्यत्वात् तावदप्रामाण्यज्ञानभावसविशिष्ट

साध्याभावपरामर्शत्वावच्छिन्नप्रतियोगिताकस्याखंडाभावस्यातत्तद्यभितित्वे नैव साध्यानुमितिंप्रतिहेतुत्वस्य

वाच्यत्वादिति नन्तूक्तं यत्र विरोधिपरामर्शकालीनं साध्यपरामर्शसहस्रमेव दंडो रक्त इत्यादि विशेषणतावच्छेदकप्रका
रकरक्तत्वाद्यंशे विशिष्टभ्रमत्वज्ञानास्कंदितं तत्तोत्तरकालं रक्तत्वादिविशिष्टवैशिष्ट्यप्रत्यक्षादेवारणार्थं
तत्तद्भ्रमत्वज्ञानव्यक्तीनां तादृशविशिष्टवैशिष्ट्यज्ञानप्रतिबंधकतायां तथापि गौरवस्य तुल्यत्वात् अस्मा
कं तु विरोधिपरामर्शस्यानुमित्यप्रतिबंधकत्वात्। अनुमितेरेव तत्रोत्पादादन्यत्र लक्ष्ये न किंचिन्न विषय
कानुमितिसामग्र्याः प्रतिबंधकत्वेनैव तत्र रक्तत्वादिविशिष्टवैशिष्ट्यप्रत्यक्षोत्पादासंभवादिति दिक्। अ
त्रोच्यते शाब्दोपमितिस्मृतिसाधारण्याद्वशं प्रत्यक्षान्यतद्वत्ताबुद्धित्वावच्छिन्नं प्रत्येव तत्तदभावपराम
र्शत्वेन विरोधित्वं वाच्यमतोनुमितेः संशयत्वासंभव प्रत्यक्षान्यत्वतद्वत्ताबुद्धित्वयोर्विशेषणविशेष्यभाव
भेदादवच्छेदकद्वयध्रौव्येऽपि लाघवात् तद्वत्ताशाब्दत्वेन तत्तोऽवनुमितित्वं च द्वयमेव प्रतिबध्यतावच्छेदक
मतः तदभावपरामर्शदशायां तद्विशिष्टस्मृतेरुद्बोधकविरहादेवानुत्पत्तिसंभवादनुगतोद्बोधकेऽस   हेत्वं॰

माणाभावादितिवाच्यं तद्वत्ताबुद्धित्वविशिष्टप्रत्यक्षान्यत्वस्य दुर्वचत्वात्स्वप्रतिबध्यतावच्छेदकत्वासंभवात्
तद्वत्ताबुद्धित्वविशिष्टयत्प्रत्यक्षं तदन्यत्वस्यावच्छेदकत्वे विरोधिव्याप्यदर्शनदशायां शंखादेरप्यनु
पस्थापत्तेस्तस्यापि निरुक्तप्रत्यक्षभिन्नत्वात् नच तद्वत्ताबुद्धित्वं प्रत्यक्षत्वं च द्वयमेव मिथो विशिष्टा
नापन्नं सदन्यत्वे विशेषणीभूय प्रतिबध्यतावच्छेदकं व्यासज्यवृत्त्यवच्छेदकत्वानंगीकारादन्यथा त
द्वत्ताबुद्धित्वस्य प्रत्यक्षान्यत्वस्य च द्वयोरेव तादृशान्यत्वस्वीकारेण सामंजस्य तयोर्विशेषणविशेष्यभा
वः व्यत्यासोक्तेरुन्मत्तप्रलपितत्वापत्तेर्वस्तुतस्तत्प्रकारकपरोक्षत्वावच्छिन्नंप्रत्यक्षवत्तदभावपराम
र्शत्वेन प्रतिबंधकत्वं वाच्यं निश्चितज्ञानवृत्तिनसाक्षात्कारत्वेन सांकर्यमियानुमितिसामग्रीप्रतिबध्यता
वच्छेदकत्वेन जातिंतरस्यासिध्या तेन समपरोक्षत्वस्य सांकर्यं। कायाप्रसंभवाच्चानुमितेः संशया
न्यत्वनियमेषामुक्तरीत्या अनुमितेन्यबुद्धौ अनुमितिसामग्र्याप्रतिबंधकतायां नानाविधतदभावपरा

मर्शानां उत्तेजकत्वकल्पनायां गौरवमिति वाच्यं अनुमितावपि तदभावपरामर्शस्य विरोधितया तत्र गौरवस्य
प्रामाणिकत्वात् अन्यथा यत्र निलपर्वतत्वावच्छिन्नवह्निव्याप्यवत्तानिश्चयोत्तरं पर्वतत्वावच्छिन्ने निलत्वा
भावव्याप्यवत्तापरामर्शः तत्रापि निलपर्वतो वह्निमानित्यनुमितिप्रसंगात् न च विधेयत्तान्यप्रकारताका
नुमितित्वावच्छिन्नं प्रत्यपि तदभावपरामर्शत्वेन सोऽदर्डै विरोधित्वात् तरं स्वीक्रियते तथा सति लाघवेन तत्प्र
कारकत्वानुमितित्वावच्छिन्नं प्रत्येव तथात्वौचित्यात् यत्र पर्वतत्वावच्छेदेन तदभाववत्तादि निलपर्वतत्वा
वच्छेदेन चैव वह्निव्याप्यवत्तामवगाहमानः परामर्श उत्पन्नः तत्र पर्वतो न वह्निमान् नीलपर्वतश्च वह्निमानि
त्येवं निर्णयाकारानुमितेः प्रसंगस्य तावतापत्यनुद्धारात्च धर्मितावच्छेदकभेदेनोक्तानुमितेः संशयत्वासंभवात्
इष्टापत्तौ च्छानुभवविरोध इति दिक् वस्तुतोऽस्मं मते अनुमितिमिन्नबुद्धौ अनुमितिसामग्र्याः प्रतिब
धकतायां नानाविधतदभावपरामर्शानामुत्तेजकत्वे सोऽदर्ड मतेऽपि घटचाक्षुषादि प्रकारकनानावि

हेत्व०

धेच्छानामुत्तेजकतायां तु लघुगौरवं अन्यथा वह्नितदभावयोः परामर्शदृशायां सत्त्वमपि घटादेश्चाक्षुषादिबु
त्पुच्छायां तन्मते घटादिचाक्षुषानुत्पादप्रसंगात् भिन्नवि[illegible]शैयेनुमितिसामग्र्याः बलवत्त्वेन साध्यत
दभावयोरनुमितेरसंभवात् अस्माकं तु विरोधिपरामर्शाभ्यां मिथः प्रतिबंधात्तत्रानुमितेः सामग्र्येव नास्ति
तो घटादिचाक्षुषार्थं न तद्गोचरेच्छाव्यक्तिनामुत्तेजकत्वमिति संक्षेपः वह्निव्याप्यधूमवत्त्वादिनिश्चय
स्य वह्न्यभावव्याप्यपाषाणमयत्वादिनिश्चयस्य धौव्यतावच्छेदकं न तादृशनिश्चयात्पवह्नितोतरानुमिति
त्वं अप्यवह्नितोतरत्वस्यानुवृत्तस्याभावात् किंतु अनुमितित्वव्याप्यं वैजात्यमेव तथा च तादृशनिश्चयाभ्यां
संशयात्मकानुमित्युत्पादे तत्रैव निरुक्तवैजात्ययोः संकरप्रसंग इत्यवश्यं रत्नकोशकृतामपि वह्निव्याप्यपरा
मर्शप्रयोज्यवैजात्यावच्छिन्नं प्रत्येव तदभावव्याप्यवत्तानिश्चयत्वेन वह्न्यभावसाधकपरामर्शप्रयोज्यवै
जात्यावच्छिन्नं प्रति वह्निव्याप्यवत्तानिश्चयत्वेन विरोधित्वमित्यनुमितेः संशयत्वाभावः तच्च मिथो विरोधि

११

परामर्शप्रयोजकवैज्ञात्यांतरं संशयात्मकाभितौ स्वीकार्यमिति [illegible]न सांकर्यमिति वाच्यं तादृशफलासिद्धौ तद्
तत्सत्त्वेन कार्यतावच्छेदकांतरकल्पनाप्रायत्त्वादिति विशेषांतरेति तदियव्याप्यदर्शनाभावविशिष्टमेव तदभावव्या
प्यदर्शनं तद्वत्ताबोधविरोधी इत्यर्थः संशयप्रात्यक्षिकायावदिति परामर्शयोरप्रामाण्यं यावन्न ग्राह्यतद्
त्यर्थः ननु विरोधित्वादप्रामाण्यग्रहोत्तरमेव कुतस्संदेह इत्यत आह अप्रग्रहीतेति ननु विरोधित्वं न साध्या
समानाधिकरणत्वं तदवच्छिन्नहेतुमत्ताज्ञाने न साध्याभाववत्ताभानजननासंभवादतो आह साध्याभावेति
ननु ह्रदो वह्निमान्धूमादित्यादाववपक्षधर्महेतुस्थलीयबाधस्य फलानुत्पाद्यमूलस्य न्यूनत्वमतो हेतुप
दं प्रकृतहेतुपरं मन्वानः मूर्ले नैवन्यूनमपाकरोतिपक्षधर्मे चेत्यादि ननु ह्रदो वह्निमान् घटत्वादित्यादाववपक्ष
धर्मेपि हेतौ बाधसंभवादियमपि मूलन्यूनत्वमतः फलितार्थमाह तथा चेति हेतौ प्रकृते तौ ननु साध्यहे
तोरित्यत्र मूले द्वंद्वसमासस्तदा साध्यस्यापिजिज्ञासालाभादसंगतिः प्रतिपक्षस्थले हेत्वोरेव तत्त्वजिज्ञासा ते हेरबं०

रतस्तत्पूरूपमाशंक्य समाचष्टे प्रकृतसाध्ययोरिति मिथो विरोधिसाध्ययोरित्यर्थः हेत्वोस्तत्त्वसंशयस्य जिज्ञासाज
नकत्वे मानाभावादित्याचष्टे न जन्यतितत्त्वसंशयजन्यं य[illegible]दिष्टं तदुच्छारणरूपं यदिष्टं तस्य साधनताज्ञा
नमित्यर्थः नन्वेवमिष्टसाधनताज्ञानादित्यस्य पृथगुपन्यासासंगतिरत एव पूर्वरूपित्वाच्च तदर्थमाह अन्यत्र
चेति प्रतिपक्षस्थलेऽन्यत्र चेत्यर्थः इत[illegible]थ च संशयाद्येतत्रापि प्रतिपक्षस्थले इति पूर्वेणाह मितिध्वेयं प्रकर
णसमस्य जिज्ञासाहेतुत्वे मानाभावादाह हेतुसमिच्छेन त्वेत्यादि ननु पूर्वपरामर्शस्य स्वतृतीयक्षण एव नाशा
त् चतुर्थक्षणे तत्परामर्शोत्पत्तिकाले तन्नाशाभिधानमसंगतमतो माचष्टे पूर्वकालइति तथा च तृतीय
क्षण एव पूर्वपरामर्शस्य नाशः नन्वेवमपि हेत्वंतरविषयव्याप्तिज्ञानस्यैव स्वाव्यवहितोत्तरोत्पन्नत्वेन पूर्व
परामर्शनाशकत्वात् पक्षधर्मताज्ञानस्य नाशकत्वोक्तिरसंगतेत्यत आह व्याप्तीत्यादि ननु व्याप्तिज्ञानपक्ष
धर्मताज्ञानयोः कस्यापि परामर्शस्य नाशाजनकतया उभयोर्नाशकत्वाभिधानमसंगतं व्याप्तिज्ञाने नैव पक्ष-

धर्मताज्ञानसतिकालएवनाशजननादत्तः प्रकारांतरमाह उत्पत्ताविति तथाचापरहेतोर्व्याप्तिपक्षधर्मताज्ञानस्या
मग्रीमपरामर्शस्यचोत्पत्तितत्पूर्वकालीनइतिमूलान्वय यद्यपिपरामर्शेपक्षहेत्वोःसंबंधस्यसंसर्गमर्यादयैवभाना
तत्रपक्षधर्मताज्ञानस्याहेतुत्वादिदमप्यसंगतंतथापिपक्षवृत्तित्वप्रकारकस्यापिपरामर्शस्यानुमितिहेतुत्वमभ्युपेत्ये
दमुक्तंस्वामिनौद्वैतदेवराविसादाविवमाप्तिपक्षधर्मताज्ञानाभ्यांइसत्रापिविभक्त्युपस्थाप्यद्वित्वंव्युत्पत्तिवै
चित्र्येणपदार्थतावच्छेदकीभूतयोर्व्याप्तिपक्षधर्मतयोरेवान्वितमित्याशयेनयथाश्रुतमेवसंगमयन्नाह अ
यत्रचेतिउत्पत्तिकाल[illegible]वेतितथाचोत्पत्तिपूर्वकालइत्यादिकंनव्याख्येयमितिभावः साध्याभावव्याप्यवत्त
याद्यात्मकस्यदूषणोपैकपतिपक्षस्यकेवलान्वयिन्यसंभवाद्याचष्टेनिरुक्तेतिव्यवहारोपैंद्रकेसर्थः ए
केकस्येतिघटमात्रवृत्त्यन्यत्वंसत्तायाजात्यन्यत्वंचकंबुग्रीवादित्वेविनिचार्यतोविशिष्टंहेतुरित्यर्थः नचैसा
तापामपिरूपसंबंधवच्छिन्नघटनिष्ठाभावप्रतियोगित्वरूपसाध्यस्यसत्तान्नतत्रव्याभिचारसत्तापदस्य हेरवं०

मूलस्य जातिपदस्य च भौत्वलोपलक्षकत्वादित्यर्थ इति भावः ननु घटनिष्ठस्य घटाद्यत्यंताभावस्य पक्षत्वे बाधः तत्र
तदभावाभिन्नत्वेन पक्षविशेषणीयत्वे चाश्रयासिद्धिरत आह घटनिष्ठेत्यादि समवेतत्वादावितितस्यापि निरुक्ताभा
त्यंन्यत्वे सति घटमात्रवृत्त्यन्यत्वादिति भाव घटत्वाभावादावितितस्यापि घटनिष्ठनिरुक्ताभावः त्वादितिभावः विशेषा
दर्शनदशायां व्यभिचारास्फुर्तिदशायां समानधर्मिकस्यैव विरोपरमर्शस्य प्रतिपक्षतोचितमिति नव्यमतानुसारेण
ह वस्तुत इति साध्याप्रसिद्धावन्वयित्वासंभवादाह व्यतिरेकीति प्रमेयत्वव्यापकीभूताभावप्रतियोगित्वेन कंबु
ग्रीवादिमत्तानिश्चयपनेत्यर्थः नन्वुक्तक्रमेण पारार्थस्यत्वे प्रतिपक्षोपन्यासकेवलान्वयीनि दुर्घट वाक्यार्थाप्रसिद्धा
प्रतिपक्षासंभवादत आह प्रत्येकेति नन्वभिधेयत्वविशिष्टाभावप्रसिद्धौ तत्कथं तत्राद्धा नत्वमत आह विशिष्टस्ये
तित्राभिधेयत्वाभावयोर्वैशिष्ट्यस्य संबंधविधयाभाने तस्याप्रसिद्धावप्यदोषादिति भावः व्यवहारोपैकस्य मूलो
क्तसत्प्रतिपक्षस्य स्वरूपसत्तएवानुमितिविरोधित्वानाभासत्वमतः स्वरूपमेव हेत्वाभासरूपं तन्मुपदर्शयतिस

73

13

त्मतिपक्षास्त्विति आभासि भूत इत्यादि यत्र विशिष्टपक्षापेक्षया साध्याभावव्याप्यत्वमेव लघु तत्र पक्षधर्मिकतद्व्या
प्तिनिश्चयत्वेनैव प्रतिबंधकत्वमित्याशयेन इह साध्याभावव्याप्येत्यादि यत्र साध्याभावादिव्याप्यवत्त्वापेक्षया विशिष्ट
पक्ष एव लघु तत्र साध्याभावव्याप्यधर्मिकपक्षनिश्चयत्वेनैव लाघवाद्विरोधित्वमित्याशयेनाह पक्षनिष्ठाभा
वेत्साध्याभावसाध्यवद्धेद्वयोर्व्याप्यावित्यर्थः एवमादिरित्यादि साध्याधिकरणत्वाभावव्याप्यवत्त्वस्यापि सङ्ग्रहः
पयहः नन्वेतेषां प्रत्येकस्य विभाजकत्वे हेत्वाभासानां पंचविधत्वानुपपत्तिरत आह विभाजकत्वमिति प्र
कृतेत्यादि हृदो वह्निमान धूमादित्यादौ साध्याभावव्याप्यवत्त्वस्य वारणाय सत्यंतं प्रकृतयोः पक्षसाध्ययोः
वाशिष्ट्यग्रह विरोधित्वे सत्या नीतिः तदर्थः अत्र प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्त्वग्रहविरोधित्वं नाद्दृशग्रहजन
कीभूताभावप्रतियोगिज्ञानविषयतामात्रं तथा सति सत्यंतवारणाय स्यसाध्याभावव्याप्यव्याप्यवत्पक्ष
स्यैव व्यावर्त्तनानुपपत्तेः तज्ज्ञानस्यापि तदभावावगाहि प्रकृतसाध्यवत्तासमुहालंबन विरोधित्वात्

हेरंब·

नापि प्रकृतपक्षकप्रकृतसाध्यकज्ञानत्वावच्छिन्नप्रति याद्दशविशिष्टविषयकत्वेन प्रतिबंधकत्वं तत्वमेव तथा निर्व
ह्निर्वह्निमानजलत्वादिसाद्धे प्रकृतसाध्यवत्तया प्रकृतपक्षग्रहस्याशाहार्यत्वात् ताद्दशग्रहत्वावच्छिन्नप्रतिबध्यता
तिवध्यत्वासिध्या तत्रसत्प्रतिपक्षाव्याप्तेः प्रकृतपक्षेसाध्यग्रहविरोधीत्यस्य व्यर्थत्वापतेश्च किंतु प्रकृतपक्षकप्र
कृतसाध्यवत्ताग्रहत्वाव्यापकविषयिशून्यग्रहं प्रति याद्दशविशिष्टविषयकत्वेन प्रतिबंधकत्वं तत्तमेव वाच्यं तथा
च विशिष्टतामात्रस्यैव यथाकथंचित्साध्यविशिष्टपक्षग्रहत्वाव्यापकत्वात् शून्यग्रहाप्रसिध्या लक्षणासंभव एवं
स्यादतपक्षसाध्ययोः प्रकृतत्वोपादानं एवमुत्तरत्रापि बोध्यं कांचनह्रदः कांचनवह्निमान धूमादित्यादौ कांचनत्वा
भाववद्व्याप्यवत्पक्षादेर्वारणार्थं मविरोध्यं तमुत्रापकस्य विशेषणं नच ह्रदो वह्निमान धूमादित्यादौ प्रकृतपक्ष
साध्यग्रहविरोधित्वाप्रसिध्य तत्र सत्प्रतिपक्षाव्याप्तिः प्रसिद्धपक्षसाध्यस्थले ताद्दशग्रहाविरोधित्वाद्विशेष्य
स्यानुपादेयत्वात् समानविशेष्यकत्वप्रत्यासत्त्या प्रतिबंधकत्वमते ह्रदत्वादिप्रकारक [illegible]ह्रदत्वावच्छिन्नं प्रति

९४

14

हृदभिन्नत्वादिज्ञानत्वेन समानविशेष्यतया प्रतिबंधकत्वात्तत्रापि साधनादिग्रहविरोधित्वप्रसिद्धेः संभवाच्च न च वाह्न्यभा
वव्याप्याभाववत्पर्वतो वह्निमादिसाध्ये पर्वतत्वावच्छेदेन वह्न्यभावव्याप्यत्वस्यापि प्रतिपक्षत्वात् तत्राव्याप्तिस्तस्य
प्रकृतपक्षे ग्रहविरोधित्वादिति वाच्यं तस्याश्रयासिद्धत्वेन लक्षत्वेपि क्षत्यभावात् यत्तु प्रकृतपक्षसाध्यवैशिष्ट्य
ग्रहविरोधिरूपस्यैव विशेषणमविरोध्यंतं तथाचोक्तप्रतिपक्षस्य त्वेपि तद्विरोधिरूपस्य प्रकृतसाध्याभाववत्त्वस्य
प्रकृतपक्षग्रहविरोधित्वान्नाव्याप्तिरिति तन्न तथा सति वह्न्यभावव्याप्यव्याप्याभाववान् पर्वतो वह्निमानिसाध्ये
वह्निव्याप्यव्याप्यवत्पर्वतात्मिकायामाश्रयासिद्धावव्याप्तिप्रसंगात् तस्यापि प्रकृतपक्षग्रहविरोधित्वात् यः प्रकृतपक्ष
साध्यवैशिष्ट्यग्रहविरोधिवह्न्यभावव्याप्यवत्पर्वतात्मकप्रतिपक्षस्तद्नायकत्वादिति ध्येयं पर्वतो वह्निव्याप्या
भाववान् धूमादिसाध्ये वह्निव्याप्याभाववान् धूमादिसाध्ये व वह्निव्याप्यवत् पर्वतात्मकबाधे तिव्याप्तिवारणार्थं
माह प्रकृते साध्ये अत्रापि पक्षसाध्ययो प्रकृतत्वोपादानमसंभवस्य वारणायेति प्रागेवोक्तं ननूक्तरूपोनापकत्वं

हेरंब

यदि तद्दुर्न यन हेतुधिविषयत्वे तद्दोषदर्शितज्ञानस्यापि कथंचिद्विशेषणज्ञानादिविरोधी यावद्धेतुत्वात्तन्नातिव्याप्ति
तादवस्थ्यमत आह तद्धेतुतापकत्वे चेति अनुमितिजनकत्वमिति निरुक्तविरोधिरूपगोचरानुमितिजनकत्वमित्यर्थः
तेन वह्न्यभाववद्व्याप्यवत्पक्षज्ञानस्य बाधस्यापि वह्न्यभावाद्यनुमितिजनकत्वान्न तत्रातिव्याप्तितादवस्थ्यं न चैवं
ह्रदो वह्निमान् नित्यादौ साध्यासमानाधिकरणधर्मवत्पक्षज्ञानस्य साध्यविधुरज्ञापकत्वादिति वाच्यं तस्यावि
रोधित्वेनालक्ष्यत्वादिति भावः पक्षस्तु लक्ष्यत्वं ग्राहयति तत्त्वेति तादृशं विशिष्टं चेत्यर्थः पक्षादिकमित्यादिपदेन
साध्यवद्भिन्नत्वव्याप्यवत्पक्षाद्युपग्रहः ननु नित्यः शब्दः शब्दत्वादित्यादौ साध्यव्यापकीभूताभावप्रतियोगिहे
तुमत्पक्षस्यापि विपक्षरूपवत्त्वात्तत्रातिव्याप्तिस्तस्य मणिकृन्मतेऽसाधारणत्वेन सम्मतेश्च विरोधित्वेनालक्ष्यत्वा
दत आह असाधारणेत्यादि ननूक्तोपाधेरसाधारणत्वेऽपि न तस्य प्रतिपक्षविधया दोषत्वं किंत्वनुमित्यौ व्याप्तिग्र
हप्रतिबंधकत्वेनैवेति मिश्रमते अव्याप्तिसंभवात् पक्षादिस्तु तत्प्रतियोगित्वादिना साधनतावच्छेदकादौ तादृशप्र

७५
८५

तियोगितावच्छेदकत्वाद्युपग्रहः॥ ननु प्रकृतसाध्याभावव्याप्यवत्प्रकृतपक्ष एवास्तु प्रतिपक्षः साध्यवत्तावुद्धौ नव्यमते
तस्यैव विरोधित्वात्तथा च पक्षनिष्ठस्यसाध्याभावव्याप्यादेरनुगमार्थं विरोधिरूपो नायकत्वघटितं लक्षणं व्यर्थ
मत आह सेश्रीघ्रतेवेति अन्यथा प्रकृतसाध्याप्रसिध्या तत्र सत्प्रतिपक्षोपग्रहो न स्यादिति भावः प्रसंगाद्दाह सत्प्रतिप
क्षेश्चेति यथासिद्धांतमिति वौधौरुहरणादिदूषस्य मिमांसकैः प्रतिज्ञादित्रयस्य प्राचीनैः कंडकोद्धारवाक्या
न्तरभावेनावयव एव शकस्यनैयायिकैस्य श्च प्रतिज्ञादिपंचकस्य न्यायत्वोपगमादिति भावः स्थापनानुमाने हे
त्वाकांक्षायां व्यभिचारादेरिव साध्याभावव्याप्यवत्पक्षत्वज्ञानः प्रतिपक्षस्यैव प्रथममनुपन्यासार्हत्वादिति भावः
प्रत्येकं समर्थत्वइति दोषत्त्रिरस्यति विशिष्टपरामर्शेति विशिष्टाभावस्य व्याप्ति विशिष्टपक्षधर्मत्वाभावस्य
त्यर्थः दुर्वारत्वादितितथा च विशिष्टाभावस्यापि दूषणासमर्थत्वात्प्रत्येकेन तथासिद्धेरिति भावः प्रत्येकाभा
वमर्थ्येज्ञानत्वेत्यादि युक्तं निरस्यति प्रत्येकेति शब्दाधिनेत्यादिनानुमानपरिग्रहः। शक्यग्रहत्वादिति तथा च

हेरंब०

प्रसक्ताभावस्योपजीव्यमेवनेतिभावः व्यर्थविशेषणत्वादित्युक्तं निरस्यति व्यर्थविशेषणत्वस्य चेति साधनइति
अयं हेतुरसाधारणव्याप्तिविशिष्टपक्षधर्मत्वाभावादित्यसाधकतानुमाने तादृशविशेषाभावस्य स्वसमाना
धिकरणप्रत्येकाभावत्वापेक्षया गुरुत्वेन व्यर्थविशेषणत्वेपि परामर्शविरोधित्वेन दूषकतायां वैयर्थ्या
दिति भावः संभाव्यत्वादिति वस्तुतो विशिष्टाभावत्वस्य प्रत्येकाभावत्वाघटितत्वादुक्तानुमानेपि न वैय
र्थ्यमिति विशिष्टाभावस्य अतिरिक्तत्वमनुश्रुत्या न वेति तदपि व्यर्थविशेषणत्वाभावासंभाव्यत्वमपि
तादृशेति अखंडविशिष्टाभावे सार्थक्याशक्यत्वादिति प्रत्येकाभावत्वापेक्षया गुरुत्वोपि विशिष्टाभावत्व
स्य भिन्नधर्मिकत्वेन वैयर्थ्यादिति भाव ननु तथापि पक्षधर्मताप्रतियोगिकाभावत्वस्यैवासाधकताव्या
प्यकतावच्छेदकत्वसंभवाद्व्याप्तिविशिष्टपक्षधर्मत्वाभाववत्वस्य तथापि व्यर्थविशेषणत्वमेवेत्यत आह वि
शेष्यादिति मात्रपदेन पक्षधर्मतात्वावच्छिन्नत्वादिप्रतिक्षेपः व्यभिचारित्वेति साध्यसाधकेपि हेतौ पक्षध

१८

16

र्मत्वप्रतियोगिकाभावः सत्वात्तस्यासाधकत्वाव्यभिचारित्वादितिभावः ननु सघेतौ व्यभिचारस्यैवासत्वात्तत्र तस्या
भासत्वाभावप्रसंजनमसंगतमतो व्याचष्टे सघेतुत्वेनेति व्याप्तिविशिष्टपक्षधर्मत्वेन निश्चयमानित्यर्थः तथा
च तादृशो व्यभिचारस्यापीति तत्रैव न तस्य संजनमिति भावः मूलमपि दूषयति तदानीमिति व्याप्तिपक्षधर्मता
निश्चयदशायां तथाविधनिश्चयात्मकसिध्यप्रतिबंधेपि कालांतरगृहीतव्यभिचारेणैव तादृशसिध्यप्रतिबं
धात्तादृशासिद्धिकालेपि व्यभिचारस्याभासत्वं सुग्रहं नाहि तदानीं सिद्धिखंडकत्वमेव तदानीमाभासत्वं यदा
कदाचित्सिं सिद्धि खंडकत्वस्यैव तथात्वादितिभाव व्याप्तिपक्षधर्मतानिश्चयाभावत्वरूपस्याज्ञानासि
द्धित्वस्य व्याप्तिनिश्चयादावसत्वात्तदनुमापकत्वासंभवाद्व्याचष्टे तत्साधारण इति तथा च परामर्शत्वव्यापकी
भूतनिश्चयत्वावच्छिन्नाभाववत्त्वमेव परामर्शाभाव व्याप्तिनिश्चयाद्यभावसंग्राहकमितिभावः ननु व्या
द्यभावस्यैव दाहाद्यप्रतिबंधकत्वादस्यापि प्रतिबंधकताद्युसंगतमत आह वस्तुतइति अभावो भाव हेत्वं०

१८

भिन्नवह्निस्तु दाहकारणीभूतोप्यभावयेवेति प्रतियोगिभेदेन वह्न्यभावस्य न दाहप्रतिबंधकत्वमिति भावः मतांतरमा
ह यद्भावत्वेनेति यादृशधर्मावच्छिन्नाभावत्वेन कारणत्वं तादृशधर्मवदेव प्रतिबंधकमित्यर्थः दाहादौ च न वह्न्य
भावत्वावच्छिन्नाभावत्वेन च कारणत्वं लाघवाद्वह्नित्वस्यैव तथात्वादिति भावः न चोत्तेजकाभावविशिष्टमणित्वाद्य
वच्छिन्नाभावव्यक्तेस्तद्घटितत्वेनैव दाहादिहेतुता न त्वाद्येः उक्तक्रमेण प्रतिबंधकत्वानापत्तिरिति वाच्यं प्रतियोगि
विनाकृतस्य तस्याखंडाभावस्य तद्घटितत्वेनैव हेतुतायामन्यथासिद्धत्वात् अन्यथा पदार्थांतरमंतर्भाव्या
प्यखंडाभावस्याहेतुतापत्त्यादेरन्यत्र विस्तृतत्वादिति भावः परामर्शविशयाभावत्वं परामर्शविषयाभावत्वं परा
मर्शविशयप्रतियोगिकाभावत्वं तादृशविषयत्वावच्छिन्नाभावस्य सिद्धतावप्यसंभवात् अनासंभो इति अति
प्रसंग इत्यये न्वयः एवमग्रेपि सद्धेतावपि तथाविधस्य साध्याभावव्यछेदकादेरभावसत्त्वादिति भावः बाधविशेष
इति पक्षनिष्ठसाध्याभावात्मनुबाधस्याभासत्वात्परामर्शविषयकप्रतियोगिताभावत्वादिति भावः साध्याभाव

वसक्षात्मनोबाधस्य तादृशविशेषणयाभावत्वविरहात् तन्नातिव्याप्त्यसंभवाद्विशेषपदं विशेषितं चेति तादृशविरोधित्वमा
त्रस्यभिचाराद्यतिप्रसक्तत्वादिति भावः ननु यदंशत्वेन विशेषणे नातिप्रसक्तिरत आह अप्रसक्तं चेति पक्षादिरि
ति पक्षादेः परामर्शविशेषणप्रतियोगिकाभावत्वविरहादिति भावः आदिपदात्पक्षतावच्छेदकाभाववत्पक्षादेरुप
ग्रहः अत एव साधनाभाववत्पक्षादेरव्याप्तेरेव शब्दमात्रेति पत्वतत्त्वयोरननुगमाद्थ्ये त्यसंभवादिति भावः
सव्यभिचारादित्यादिना विरोधो ग्रहाः तदंशत्वेन सव्यभिचारः इदन्त्वेन निसो घटः इत्यादिद्रव्यत्वे साध्ये
तु निश्चितमेव साध्याभावः व इति लमप्रसिद्धं ननु तन्मात्रं प्रमेयत्वसाध्ये तु तदप्रसिद्धमित्याशयेन साध्या
न्तरमाह प्रमेयो वेति अश्रया।सिद्धि संपादनाय नित्यत्वोपादानं तदर्थेति तदन्येत्यत्र तत्पदस्य योर्थे व्यभि
चारादितदप्रसिद्धेरित्यर्थः तथा च तत्रत्याश्रयासिद्ध्याद्यव्याप्तिरिति भावः साध्यस्यापि विशिष्टज्ञानोत्पाबा
धेतिव्याध्यप्तापत्तिरतः स्वातंत्र्येण साध्याभावगाहीनां निवेशयन्नाह साध्यतावच्छेदकेत्यादि साध्याभावगाहीत

हेरंब

दिति प्रकृतसाध्यावगाहीनस्तादृश विशिष्टज्ञानस्य विरोधित्वमित्यर्थः साध्यव्यतिरेकसामानाधिकरण्यभावमात्रस्य स
व्यभिचारएवप्रागंतर्भावितत्वात् पक्षवृत्तित्वविशिष्टेत्यादिना पक्षवृत्तित्वविशिष्टव्यतिरेकव्याप्याद्यभावसो
पग्रहः नचेतिकाव्यभिचारग्रेन्वयः तदसिद्धत्वं परामर्शविरोधित्वमात्रं साधारण्याद्यतिप्रसक्तमतःसत्संतं प्रकृत
पक्षप्रकृतसाधनयोर्वैशिष्ट्यस्य प्रकृतसाध्यस्य च यो ग्रहस्तद्विरोधि सद्धेतुव्याप्तिग्रहविरोधि तदन्यत्वे
नतिसप्तर्थः केवलस्य व्याप्तिग्रहविरोधित्वतदन्यत्वशोभौ साध्याप्रसिद्ध्याद्यव्याप्तितोविरोधित्वांतं प्रकृतपक्षसा
धनयोर्वैशिष्ट्यग्रहेत्याह विशिष्टपक्षेत्यादिना संग्रहद्वतिवह्निमद्वृत्तित्वविशिष्टद्रव्यत्वस्वरूपायास्वरूपा
सिद्धेःसाध्यसामानाधिकरण्यांसे व्याप्तिग्रहविरोधित्वेपि प्रकृतपक्षसाधनवैशिष्ट्यग्रहविरोधित्वान्तद्वि
रोधिभूयत्व्याप्तिग्रहविरोधि यत्तदन्यत्वस्य तत्र सत्त्वादिति भावः ह्रदपक्षेवह्निसाध्यकधूमस्य स्वरूपासिद्धिमा
त्रं कांचनमयवह्निसाध्यकतुव्याप्यत्वासिद्धिरपि सा च साध्याप्रसिद्धिसाधनप्रसिद्धिरूपाद्विधेति साध्य

साधनयोर्वाच्वनमयत्वोल्लिखः साध्यविशेषणासिध्यादेरेव व्याप्तिग्रहविरोधिनः प्रसिद्धत्वात् वो दाहातादृशोऽपि प्रकृ
तपक्षसाधनवैशिष्ट्यप्रकृतसाध्यग्रहविरोधिनोऽद्दस्य थेउच्यत इसनंतरास्मट त्वं प्रदाय सिद्धपाठे लिख्य
ते साधारण्यकथिता साधारण्यानुपसंहारित्वभिन्नं ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपमसि
द्धिः यत्र साधारण्यादिकमप्रसिद्धं तत्र चैव द्रव्यव्यभिचारित्वेऽयमत्ववान् हेत्वाद्यत्वाद्वे सा दोषः यत्र साधारण्यादिक
मेवासिद्धि तत्र तदन्यत्वं नोपादेयं शक्यानुगमस्याकिंचित्करत्वात् परामर्शे च व्याप्तिव्यतिरेकतोऽप्युपादेयानातोव्य
तिरेकव्याप्तिविशिष्टपक्षधर्मताभावादावव्याप्तिः साधारण्याद्यनिरूपितातया ज्ञानस्य विषयतया पराम
र्शविरोधितावच्छेदकरूपं वासिद्धिः अतएव द्रव्यत्वाव्यभिचारिगुणद्वयोभयसमवेतवानद्रव्यत्वसमानाधि
करणसमवेतकर्मसमवेतवान्वा घटो द्रव्यं सत्त्वाद्रव्यकर्मसमवेतसमवेतत्वाद्वे सा दोषो गुणद्वयोभयस
मवेदिनिष्ठस्य द्रव्यत्वव्यभिचारित्वादेः सत्त्वादिनिष्ठद्रव्यत्वव्यभिचारित्वाघात्मकसाधारण्यादितो न तिरि

हेत्वं०

कृतेपि न क्षति पर्वतस्य: पर्वतो दाहनान्य दहनवान धूमात् धूमादित्यादावसिद्धि संपादनाय हेत्वाभासः लक्ष
णे कारि निरनुसर्तव्या तत्र ज्ञानस्य विषयतया विशिष्टपक्षग्रहविरोधितावच्छेदकं रूपमाश्रयासिद्धं विशिष्ट
पक्षविशिष्टसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकं रूपं स्वरू
पासिद्धिः संग्रहस्थले चैकधर्मनीतं गगनं रूपवच्चाक्षुषस्पर्शत्वादित्यादौ गगनादेर्निस्पर्शत्वादिसाध्
के एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्त्वात् गुणान्यत्वविशिष्टसत्त्वे द्रव्यत्वस्य व्यभिचारी गुणान्य
त्वादित्यादावपि नाव्याप्ति तदुभयान्यासिद्धिर्व्याप्यत्वासिद्धिः पक्षादिभेदेनासिद्धभेदाच्च नाश्रयाभसि
द्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं कर्त्तव्यमिति अथ परं व्याख्यायते परामर्शविरोधितावच्छेदकत्वं साधा
रणादेरव्यवित्यतो मिनोतं मूलोक्ता साधारणस्य सत्प्रतिपक्षौ विधया अनुमितिप्रत्येव विरोधित्वात्तद
न्यत्वप्रवेशेन साध्यासामानाधिकरण्यस्य विरुणायोगादादाह यित्वेति साध्यसामानाधिकरण्यग्रहवि

रोधत्वमवच्छिन्नेत्यर्थः परामर्शविरोधिनी कामिनीजिज्ञासामादाय कामिन्यादावतिव्याप्तेर्वारणाय ज्ञानस्येति ।
यादृशविशिष्टविषयकज्ञानत्वं प्रकृतपरामर्शत्वाव्यापकविषयताशून्यज्ञानप्रतिबंधकतावच्छेदकीभूत
विषयितानतिरिक्तव्यक्तिसाधारण्यादिभिन्नस्तादृशविशिष्टपदार्थोपस्थितिरिति तु फलितार्थः ननु हृदः कां
चनमयवह्निमान् धूमादित्यादौ साधारण्याप्रसिद्धेः तत्र स्वरूपासिद्ध्यादावव्याप्तिरत आह यत्रेति
अप्रसिद्धमिति तत्र तदन्यत्वं नोपादेयमिति सर्वेन्वयः ननु वह्निव्यभिचारिमेयत्ववान् पर्वतो वह्निमान्मे
यत्वादित्यादौ आश्रयासिद्धावव्याप्तिर्वह्निव्यभिचारिमेयत्वाद्यात्मिकायाः तस्याः साधारण्याद्यभिन्नत्वा
दत आह यत्र चेति मतौ तु बं तत्र यं पाक्षिभूतस्य विशेषणं तत्रापि प्रथमेनासाधारणत्वं द्वितीयेन साधा
रणत्वं तृतीयेनानुपसंहारित्वं *आश्रयासिद्धेर्लभ्यते ननु परामर्शीयघ्रचये व्याप्तिगर्भः तदा व्यतिरेक
व्याप्तिविशिष्टपक्षधर्मताभावाद्व्याप्तिरत आह परामर्शे चेति ननु द्रव्यत्वाव्यभिचारिद्रव्यगुणोभयसमवे

हेरंबं०

तवान्। घटो द्रव्यं सत्त्वादित्यादौ द्रव्यगुणोभयसमवेतनिष्ठद्रव्यत्वव्यभिचारादिरूपाया आश्रयासिद्धावव्याप्तिः त
स्यासत्त्वादिसाधननिष्ठं यद्द्रव्यव्यभिचारित्वाद्यात्मकं साधारण्यादिकं तद्भिन्नत्वाभावात् न च द्रव्यत्वाभावव्यभि
चारिद्रव्यसमवेते गुणे वसमवेतत्वमेव तत्राश्रयासिद्धि द्वयोरपि पक्षधीविरोधित्वे नैकशेषस्य दुरुद्धरत्वादत आ
ह साधारण्याद्यनिरूपितयेति साधारणत्वाद्यनवच्छिन्नयद्विषयताकज्ञानत्वेन परामर्शप्रतिबंधकत्वं तत्त्वमि
त्यर्थः कथिताश्रयासिद्धिज्ञानस्य हेतुभूतसत्त्वनिष्ठद्रव्यत्वव्यभिचारित्वानवच्छिन्नविषयताकस्यैव परामर्शवि
रोधित्वान्न तत्राव्याप्तिरिति भावः उक्तानुशयं स्वयमेवाह अत एवेति द्रव्यत्वासाधारणीभूतसत्त्वनिष्ठव्यभिचा
रभिन्नत्वात् गुणसमवेतमात्रेत्वावश्यात्वसंभवाद्द्रव्यपदं गुणपदं त्वाश्रयासिद्धिसंपत्तये साधारण्यरूपाया
माश्रयासिद्धेः व्याप्तिमुद्धि सा साधारण्यरूपापांतस्या मव्याप्तिमुद्धरन्नाह द्रव्यत्वसमानेति द्रव्यत्वसमाना
धिकरणे यो गुणसमवेतत्वे सति कर्मासमवेतः तद्वान्यघटादिस्तदन्वयः अत्र गुणासमवेतत्वविशिष्टकर्मासमवेत

निष्ठं यद्रूपवत्ता सामानाधिकरण्यं तद्रूपाश्रयासिद्धेर्द्रव्यकर्मासमवेतत्वविशिष्टसमवेतात्मकं यत्साधनं तन्निष्ठासाधा
रण्यभिन्नत्वेपि तद्विषयतावच्छिन्नायाः परामर्शविरोधितायाः प्रकृतसाधनघटितासाधारण्यविषयतानवच्छि
न्नत्वान्नाव्याप्तिरिति भाव गुणसमवेतस्य कर्मासमवेतस्य च प्रत्येकं तत्त्वाश्रयासिद्ध्यसंभवादुभयोरुपा
दानं द्रव्यत्वसाध्ये समवेतमात्रस्य हेतुतायामसाधारण्यासंभवादाह द्रव्यकर्मासमवेतेति यद्यपि द्रव्यासमवेत
मात्रस्य हेतुत्वेपी तन्निष्ठासाधारण्यमेदोत्तेजकाश्रयासिद्ध्यसंभव इति तथाप्याश्रयासिद्धिघटकस्य गुणत्वा
देरेवस्फुटमसाधारण्यामेदोल्लम्भतद्दृष्टान्तेन विशिष्टो हेतुरुक्तः इत्याहुः इत्यादावित्यादिपदेन वह्न्यभावव्यापकी
भूताभावप्रतियोगितालक्षणवान्पर्वतो वह्निमान् जललक्षणप्रमाप्रकारादित्यादेरुपग्रहः तेन जलत्वनिष्ठनिरुक्ताभा
वप्रतियोगित्वरूपाश्रयाश्रयासिद्धेः प्रकृतसाधननिष्ठानुपसंहारित्वाभिन्नत्वेपि न तत्राव्याप्तिरिति भावः
ननु पर्वतान्यः पर्वत इत्यादौ परामर्शस्याहार्यत्वनियमतद्विरोधितासंभवादाश्रयासिद्ध्यादावव्याप्तिरत आह हेत्वं:

पर्वतान्यद्रसादि हेत्वाभासो क्तेति अन्यथि सादिना प्रागुक्तहेत्वाभासलक्षणाव दिसर्थतायाश्चानादृशस्थले हेत्वप्रसि
ध्यादिकं पत्रयावत्संभवति तत्र तावद्व्याप्यत्वमेवासिद्धत्वं वक्तव्यं शब्दैकदेशस्या किंचित्करत्वादिति भावः तादृशप्र
कृतपक्षधर्मिकप्रकृतसाध्यव्याप्यप्रकृतहेतुमत्तावगाहित्वस्य विनिरेकात्तादृशविशिष्टविषयकनिश्चयविरोधि
विषयताप्रयुक्तः साधारण्यं सविभिन्नं तादृशविशिमेवासिद्धिः तादृशविशिष्टविषयकः निश्चयविरोधिविषयताः
प्रयुक्तत्वं तु तादृशनिश्चयत्वाभावव्याप्यविषयितावघटितप्रतियोगिकत्वरूपं तत्रैव व्याख्यानमिति ध्येये असि
द्धेस्तु निष्पादाहात तत्रेति विशिष्टेति प्रकृतपक्षतावच्छेदकविशिष्टेत्यर्थः अत्रापि पर्वतोन्यः पर्वतोन वह्निमान्धूमादि
त्यावाश्रयासिद्धिस्वरूपे पूर्वोक्तरितिरनुसर्तव्या एवमग्रीमयोरपि विशिष्टपक्षे साध्ये अविरोधि नैइत्संलेनपक्षा
प्रसिद्धि हेत्वप्रसिद्ध्योरव्युदास यत्र कामिनी पक्षो हेतुश्च तत्रा विशिष्टपक्षहेतुज्ञानं कामिनीज्ञानमेव तद्विरोधि
त्वात् कामिनी जिज्ञासायाः कामिन्यां पक्षभूतायां हेतुभूतकामिनीवैशिष्ट्यज्ञानं विरोधित्वाद्विशेष्यतावच्छेदक

कामिनीज्ञानादावतिव्याप्तिवारणाय ज्ञानस्येति तदुभयेति विशिष्टपक्ष विशिष्टसाधने स्यर्थ नच ह्रदत्ववत्पर्व
तोवह्निमान् धूमादित्यादौ पर्वतोवह्निमान् पर्वतत्वादित्यादौ च ह्रदत्वाद्यभाव विशिष्टपर्वतस्य
प्रकृत पक्षसाधनग्रहविरोधित्वात् तादृशस्वरूपासिद्धावव्याप्तिरिति वाच्यं तत्र स्वरूपासिद्धिविरहेऽपि पक्षत
भावादाश्रयासिद्ध्यादेस्तत्र दोषत्वात् आश्रयासिद्ध्याभिकेवलतत्र स्वरूपासिद्धिः तत्राविरोधिन इत्यंतस्यानु
पादेयतया उक्तप्रायत्वाच्चेति भावः ननु समानप्रकारकज्ञानस्यैव विरोधित्वात् प्रकृतसाधनाभावविशि
ष्टप्रकृतपक्षस्य वा स्वस्वरूपासिद्धिः कृतमनुगमननिरुक्त्या अतः आह संग्राह्यत इति चेति अन्यथा विशिष्टपक्षस्य वि
शिष्टसाधनस्य चाप्रसिद्ध्या तत्संग्रहो न स्यादिति भावः उभयभिन्नेति आश्रयासिद्धिस्वरूपासिद्धिभिन्नेति आ
श्रयासिद्धिस्वरूपासिद्धिभिन्नेत्यर्थः ननु पर्वतकाञ्चनवह्निमान् द्रव्यत्वादित्यादिस्थलेपसाव्यत्वासिद्धाव
व्याप्तिः तत्राश्रयासिद्ध्याः घप्रसिध्य तदन्यत्वोऽस्माद्धिकत्वात् एवं दल आह पक्षादि । भेदेनेति न चैवमपि काञ्चनपर्व

हेरंब०

र्वतो वह्निमान् कांचनपर्वतादित्यादौ हेत्वप्रसिद्ध्या व्याप्तितस्य प्रकृतपक्षगृहविरोधित्वेन आश्रयासिद्धितया तद्भि
न्नत्वाभावादिति वाच्यं तस्मिँल्लक्षणेपि सत्त्वाभावादसिद्धेश्च पक्षसार्वदिक्कत्वादिति भावः कस्यचिद्व्याप्यत्वासिद्धि
लक्षणमाह सविषयकेत्यादिना साध्यसाधनयोरप्रसिद्धेः संग्रहार्थमवच्छेदकान्तरं तं विरोधितावच्छेदकरू
पस्य विशेषणं धूमवान् वह्नेरित्यादौ ज्ञानगतधर्मस्य प्रकृतसाध्यसाधने ग्रहविरोधितावच्छेदकत्वासंभवे
पि कामिनीजिज्ञासादेरेव तथात्वानाव्याप्तिरित्याशयेनोक्तं सविषयकवृत्तिस्तुत्तं हेत्वप्रसिद्ध्यादिज्ञानस्या
पि निरुक्तविरोधितावच्छेदकीभूतसत्त्वादिधर्मवत्त्वाद्धर्मवत्त्वासंवापत्तिरतः प्रकृतपक्षेत्यादि अथ पर्वता
दः पर्वतो ह्रदान्यदहनवान् धूमान्न्वधूमादित्यादित्यादौ हेत्वप्रसिद्ध्याद्यव्याप्तिकामिनीजिज्ञासात्वस्यैव तत्र प्रकृतप
क्षप्रकृतसाधनवैशिष्ट्यवद्ग्रहे विरोधितावच्छेदकत्वात्तस्य च प्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदकत्वाभावे
न निरुक्तरूपाप्रसिद्धिरिति वाच्यं प्रकृतपक्षप्रकृतसाधनवैशिष्ट्यग्रहे सनेन तादृशग्रहत्वाव्यापकविषयताश्रय

२२
२९

ग्रहस्यापि विद्यमानत्वेन पर्वतो वह्निमानित्येवं ग्रहस्यापि तथात्वात् तद्विरोधितावच्छेदकपर्वतधर्मिकधूमाभावनिश्चयत्व
स्येव प्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदकस्यासोलभ्यादिति भाव येनसंबन्धेन विरोधितावच्छेदकं तेनैव सं
बन्धेन तद्वत्त्वसुमत्त्वलाभार्थं ज्ञानस्येतु क्तं तेन स्वरूपासिद्ध्यादिज्ञानस्य स्वसंयोगादिसंबन्धेन पक्षधर्मिकहेतु
भावनिश्चयत्वाद्यात्मकतादृशरूपशून्यत्वेपि न तत्रातिव्याप्तिः तादृशज्ञानविषयत्वं घटादौ विषयीभूतहेत्वाभासत्वं च व्य
भिचारादावतिप्रसक्तमत उक्तम् अप्रसिद्धेरिति ननु पर्वतो काञ्चनमयवह्निमान् धूमादित्यादौ साध्याप्रसिद्धिज्ञान
स्य प्रकृतपक्षसाध्यवैशिष्ट्यावगाहि विरोधित्वादेव तद्विषयीभूतसाध्यप्रसिद्धौ लक्षणसंभवात् साध्यपदं विफल
मत आह साध्यतावच्छेदकविशिष्टेति अन्यथा प्रकृतसाधनग्रहविरोधिन पर्वतावृत्तित्वविशिष्टवह्नित्वज्ञानस्य प्रकृत
पक्षसाध्यवैशिष्ट्यग्रहविरोधित्वात् तद्रूपशून्यत्वाभावेन तद्विषयीभूतायां साध्याप्रसिद्धौ अव्याप्तिरेव स्या
दिति भावः लाघवादाह तत्स्वं इति निरुक्तस्यालीकसाध्यप्रसिद्धेरित्यर्थः कश्चिदित्यस्वरसस्तत्त्व आयत्र ता श्रामा हेरंब

मा एषकस्यैव ज्ञानस्याविरोधित्वात्त्वज्ञानसंदितस्यस्वरूपासिद्धिज्ञानस्यानिरुक्तरूपशून्यत्वात्तद्विषये स्वरूपासिद्ध्यादा
वतिव्याप्तिरित्यादिकं दृष्टव्यं न तु व्याप्तेरसिद्धिर्व्याप्यत्वासिद्धिरिति वुत्तत्वा व्याप्तिविरहस्यैव व्याप्यत्वासिद्धिपदा
र्थीत्वात्साध्याप्रसिद्ध्यादिसाधारणतल्लक्षणेन युक्तमिति साशंक्यामपाकरोति साध्यहेत्वित्यादितथाच व्याप्यत्वासि
द्धिपदं न योगिकं अपि तु रूढमिति भावः तथाच व्याप्यत्वानवच्छेदकं तस्यानिल धूमत्वादेः तादृशेनेति व्याप्यतावच्छे
दकीभूतेनेत्यर्थः तेन द्रव्यं गुणान्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्तात्वस्य स्वसमानाधिकरणं गुणान
न्यतद्दृहीनत्वे व्यवच्छेदकत्वं न च माहाकालनिरूपितविशेषणतया गुणान्यत्वस्य हेतुतायां गुणान्यत्वस्या
पि द्रव्यत्वव्याप्यतावच्छेदकत्वादुक्तदोषतादवस्थ्यं प्रकृतहेतुतावच्छेदकत्वसंबंधेन यद्व्याप्यत्वं तदवच्छेदकां
तराघटितत्वस्यैव प्रवेशत्वादिति भावः धूमप्रागभाववत्त्वस्य धूमविशिष्टराशभत्वादेर्वह्निव्याप्यतावच्छेदकांतर्भू
भूतधूमत्वादिघटितत्ववच्छेदकत्वं न तस्या समानाधिकरणेनेति प्रकृतहेतुतावच्छेदकताघटकसंबंधेन यत्स्वा

धिकरणं तत्तत्प्रकर्तव्याप्यतावच्छेदकताघटकसंबंधेन वृत्तित्वं मतेऽस्यार्थ तेन धूमत्वधूमप्रागभावत्वाद्योरपि यथाक
।चित्संबंधेन मिथः सामानाधिकरण्येऽपि न क्षतिः प्रकृतहेतुतावच्छेदकताघटकसंबंधेन स्वाधिकरणे तेनैव संबंधे
न प्रवर्त्तमानत्वं तु स्वसामानाधिकरण्यं न वाच्यं धूमत्वप्रकारकप्रमाविशेष्यत्वादेरपि वह्न्यादिव्याप्यताव
च्छेदकत्वापत्तेः धूमप्रागभावादिवृत्ते लिंगप्रमाभावत्वादृशीनां समर्थत्वादिति परामर्शीयमूलमनुरुध्य सामा
नाधिकरण्यमपेक्ष्य ।। तादृशोनवेति धूमत्वादेरपि स्वात्मकतादृधर्मघटितत्वावच्छेदकत्वं न स्यादतो धर्मांत
रेणासंतरपदं न चैवं धूमत्वविशिष्टधूमत्वमप्यवच्छेदकं स्याद्धूमत्वस्य विशिष्टाभिन्नतया धर्मांतरत्वाभा
वादिति वाच्यं स्वानवच्छिन्नप्रकारतावच्छेदकत्वस्य धर्मांतरपदेनोक्तत्वादिति भावः तत्त्वं व्याप्यानतिरिक्त
वृत्तित्वं यद्यप्यवच्छेदकत्वमिति सनुषज्यते सत्तस्येति वह्निमान् द्रव्यादित्यादौ द्रव्यत्वादेरनवच्छेदकत्ववारणा
यानतिरिक्तवृत्तित्वांशस्यावश्यकत्वादिति भावः तथात्वं व्याप्यतावच्छेदकत्वं कालिकसाधारणयोः परत्वापर

हेरंब०

तत्त्वज्ञासोः प्रमाणाभावादाह षड्विंशतिर्वेतिइदमुपलक्षणं वेगादिसाधारण्यपरंस्वरूपस्य ज्ञाने रसत्वेऽ
ष्टाविंशतिर्वेत्यपि द्रष्टव्यं व्यक्तिवाहुल्यकृतगौरवं दर्शयन्नाह एवमिति - - - - यत्वासाविति तथात्वं न तस्याप्य
ति पूर्वेणान्वयः ननु तिल धूमत्वादिकं विनसास्नावत्त्वादिकमप्यवच्छेदकं मा भूत् को दोष इत्यत आह हेतुतेति
तादृशेति हेतुतावच्छेदकविशिष्टेत्यर्थः केवलान्वयिखंडकानामनुमाह साध्यव्यभिचारित्वेति साध्याव्यभिचारि
तद्धेत्सतिसंबंधसमानाधिकरणो यस्तादृशो हेतुतावच्छेदकाविशिष्टे हेतुस्तस्येत्यर्थः ज्ञानस्येतिपक्षधर्मतेत्या
दिनिरुक्तेति स्वरूपसंबंधात्मकव्याप्त्यवच्छेदकत्वाभावस्य हेत्वाभासत्वायोगादित्यर्थः यद्विषयकज्ञानम
नुमितेः परामर्शस्य वायात्वाभावमुद्रया विरोधितस्यैवाभासत्वात् न च हेतुतावच्छेदकधर्मावच्छिन्नमेव साध्य
व्यभिचारि न संबंधित्वं व्याप्तिस्तादृशसंबंधितामात्रस्य तत्त्वे पर्वतिपव ह्निरेवतथात्वा धूमवान्वह्नेरित्यादि
प्रयोगेपि बाधनियतापत्तेः तथा च याद्याभावविधयैव हेतुतावच्छेदकस्य निरुक्तनवच्छेदकत्वदोष इति वाच्यं

पराईस्थले व्याप्तेरतिप्रसक्तधर्मेण हेतुप्रयोगस्यापि दृष्यादिग्रहस्थानत्वादेवातिप्रसंगभंगे हेतुतावच्छेदकधर्माव
च्छिन्नत्वस्य व्याप्तावनेतरभावादिति भावः ननु व्यर्थविशेषणत्वमपि तियद्रूपेण हेतुः प्रयुज्यते तस्य स्वसमाना
धिकरणौ व्यापतावच्छेदकत्वांतरघटितत्वमपिति विभाजकसूत्रथेति हेत्वाभासाभ्व्रययोत्काइसंतिमसूत्रस्थ
चकारेण सर्थं प्रथथगेव हेत्वाभोदि व्यतिरिक्तमेव न च धूमादिसत्त्वेवसम्प[illegible] वह्नेनिल धूमादिस
त्रप्रतियोगिधिकमेव निग्रहस्थानमस्तिरुतं च शब्दसमुच्चयेनेतिवाच्यं हेत्वधिकमिति सत्त्रदृष्टा हेतुद्व
यादिप्रस्थलयेवाधिकस्थलएवाधिकस्यनिग्रहस्थानत्वादिति भावः ॥६७॥ मणिकृता विवक्षितायाः सप्रकारक
त्वास्वीकारादाह अतिरिक्तेति सप्रकारकविशेष्यतावादिमतेनेत्यर्थः तंपक्षनिष्ठत्वं यद्भावान्वैतराप्रका
रांतरवैयर्थ्यमतो न्यथा व्याचक्षेपक्षइत्यादिना प्रकारभावे तत्र पदि ताहृशप्रकारस्याभाव इति लत्पुरुषः
तदा साध्यस्य सलग्नतियोगित्वाभावाद्बाधमात्रासंग्रहः स्यादतकर्मधारयाभिप्रायेणायोजयति ग्रंथका हेत्व०

रः साध्याभाववद्वृत्तिहेत्वादीत्यादिना हेतुतावच्छेदकाद्युपग्रहात् ननु पक्षधर्मिकसाध्याभावप्रमात्वरूपस्याबा

धत्वस्य ग्रहे पक्षे साध्याभावस्याभानादधेत्यादिमूलासंगतिरत आह साध्याभावेति पक्षधर्मिकेत्यादि आ

वश्यकाभिप्रायेणेति पक्षसाध्याभाववानिति ज्ञानस्य स्यान्यांशे साध्याभावप्रमात्वग्रहेपि पक्षधर्मिकसाध्य

नुमितेरविरोधित्वात् पक्षांशे साध्याभावप्रमात्वस्यैव ग्रहस्तादृशानुमितेः विरोधित्वम् पक्षांशे साध्याभावप्रमात्वं

च साध्याभाववत्व पक्षधर्मिकसाध्याभावप्रकारकत्वनिरूपवश्यं तादृशप्रमात्वग्रहदशायां पक्षे साध्याभावस्य भानमि

ति भावः ननु पक्षविषयतानिरूपसाध्याभाववत्वद्विशेष्यतावच्छिन्नसाध्याभावप्रकारकत्वमेव पक्षांशे साध्याभाव

प्रमात्वं वाच्यं तच्च प्रत्यक्षसाध्याभावस्याभानेपि संग्रहमनतिकल्पांतरमाह साध्याभाववत्सिति पक्षनिष्ठस्येत्यादि

मूले पक्षे साध्यसंशयस्यादिपक्षे साध्यसंशयस्यानुमानांगत्वानुरोधात् तत्त्वेपि व्याप्तिविशिष्टपक्षधर्मता

ज्ञानोदयात् तदुत्तरमनुमितेरेवोत्पादेन विरोधिव्यभिचारसंशयशानुत्पत्तेरित्यर्थः तथाच साध्याभाववत्वां

२५

25

शोनिश्चयाकारोव्याप्तिर्ग्रहकानुकूलतर्कविरहतोवाव्यभिचारसंशयोव्याप्तिग्रहविरोधितीपक्षीयसाध्यसंशयान्नानुमा
नैमात्रोच्छेदइतिभावःपक्षेसाध्यसंशयस्यमणिकृएमतेनुमानांगत्वाभावात्तदुपेक्षफलितार्थमाहव्याप्त्याविसाद्ि
तत्समेतिष्टांद्धेतार्थनदोषापक्षेतिनव्याप्तिग्रहविरोधिव्यभिचारसंशयोत्पादाविस्यर्थःननुव्याप्तिविशिष्टव
धर्मताज्ञानेनप्रतिबंधादेवव्यभिचारसंशयानुत्पत्तिसंभवादनुमित्युत्पाददर्शनंव्यर्थमतआहअनुमित्य
दित्यादिफलतोयातिफलद्वारावपिव्याप्तिविशिष्टपक्षधर्मताज्ञानस्यव्यभिचारसंशयविरोधित्वप्रदर्शनायेत्यर्थः
फलतोपितापिरनास्यापांअजनितफलेनापिपरामर्शेनव्यभिचारधीप्रतिबंधात्स्वरूपतोविरोधित्वस्या
वश्यवक्तव्येफलद्वारातथात्वेमानाभावात्एतदेवस्फुटिकुर्वन्नाहाअतएवेतिअवस्तातस्तन्नचैवमित्यनु
मानात्कमित्यंतएव■शंकाग्रंथःयदिव्यभिचारज्ञानमात्रंविरोधितदापक्षीयव्यभिचारसंशयादनुमान
मात्रोच्छेदयदिसाध्यसंशयस्यानुमितिहेतुत्वंस्यात्तस्मादपितदनुरोधिनव्यभिचारसंशयसत्वादनुमानमात्रो हरं॰

२५

छेदः नचैतदस्ति यत्र प्रथमत एव व्याप्तिविशिष्टपक्षधर्मताज्ञानमनुमितिस्तत्र व्यभिचारादिविशेषदर्शने सति संशया
योगादित्याशयेन सिद्धांतयैतिमूले व्याप्तस्य पक्षधर्मताज्ञानादित्यादिनेत्युक्तमुपपत्स्यामनंचेत्यादि यद्यपि
हेत्वाभासस्यानुमित्याभासतायां जनकत्वं व्यापकत्वमित्युक्तौ नापूर्वदोषः तथापि शंकेयं समव्याप्तत्वं प्रयोज
कत्वमित्यभिप्रेत्येति ध्येयं कांचनमयत्वविशिष्टस्य वह्नेरप्रसिद्धावशुद्धं वह्निमद्धायौ संदिग्धसाध्यक
त्वरूपस्य पक्षत्वस्यासिद्धिसंभवात्तदप्रसिद्धेरप्रसक्तत्वेन निराकरणायोगादाह बाधके त्यादि अनुमिते
र्बाधकं विरोधियज्ज्ञानं साध्यस्य तदभावस्य वा विशिष्टज्ञानं तन्निबंधने त्यर्थः तेन विशिष्टसाध्यस्य तदभा
वस्य च प्रागुपोलत्वाद्विशिष्टसाध्यप्रसिद्ध्या प्रसिद्ध्या साधकमाननिबंधनायापि पक्षासिद्धेः खंडनदेहुत्वा
द्बाधकमानमात्रोपन्यासानौचित्यमित्यपास्तं उत्क्रमेणासिद्धिबाधयोरेवोपन्यस्तत्वादिति ध्येयम
लेव ह्रौ काञ्चनमयत्वसाध्यकलिंगस्यासिद्धे व्यभिचाराच्च संभवतीपतितो शेषः तथाचोपनीतकाञ्चन

मपत्वविशिष्टवह्न्यनुमितेर्भ्रमेसत्वमप्रसिद्ध्यादिहेत्वासोभोधिनलघेवोपपन्नेनबाढस्येहेत्वाभासत्वंसाधय
तीतिभावः तत्पक्षत्वसाध्यकानुमित्याभासत्वंतत्पक्षत्वसाध्यहेत्वाभासाधीनमित्येवंनियममनुरोरु
त्तमुत्त्वेदृष्यतिलिंगस्येत्यादिसाअमुच्चापदेतुमाह: वह्निरितिवह्निसाध्यकसलिंगकपरामर्शजानुमितिस्थ
लइत्यादिस्त्वादृशानुमितेरेवपूर्वप्रक्रांतत्वादितिभावः वस्तुतस्तु धर्मिकतत्पराकानुमित्याभासत्वंत
त्पक्षकतत्साध्यकहेत्वाभासाधीनमिवयात्तथाचलिंगजन्यायाः पर्वतकांचनमयवह्निमानित्या
नुमितेर्वह्निपक्षककांचनमयत्वसाध्यकानुमित्याभासत्वाभावेपिवह्निधर्मिककांचनमयत्व
प्रकारकानुमित्याभासत्वात्लिंगस्येत्यामूलंसम्पगेवेतिप्रतिभः स्वमतेज्ञानस्यैवसाध्याभावस्याभास
त्वानचेत्तस्यासंगतेराह अनुमितेः पूर्वमित्यादिभवतेवेति एवंचनचसाध्याभावामतेज्ञानाप्रतिबंधक
इतिमूलार्थः अधिकबलंयसतत्वेनेतिमत्रमंनिरस्यंत्राह अधिकबलरूपत्वेनेति तृतीयासंगमार्थप्रस्य हेरन·

ति अपेक्षणीयत्वमिति साध्याभाववत्ताज्ञानस्य प्रमात्वनिश्चयं विनापि व्यभिचारस्याशङ्कायास्साध्याचरिष्टव्यभिचा
रननुव्यभिचारज्ञानस्य न साध्याभाव। निश्चयमात्राधीनत्वं यद्विनाप्रामाण्यकं नास्ति निश्चितस्यापि व्यभिचारस्याज्ञा
नात्तु। किंतु साध्याभावज्ञानप्रामाण्यनिश्चयाधीनत्वमेवेत्यतस्तथैव व्याचष्टे साध्याभाव इति निश्चयतोयेनेति व्या
निश्चयविषयतापन्नः क्रियतेयेन विशेषणेनेत्यर्थः निश्चयप्रामाण्ये कार्यज्ञानस्यैव प्राचीनैरर्थनिश्चाय
कत्वोपगमादितिभाव अत्रबाधग्रंथे साध्याभाववत्त्वमिसाद्धिनाः पक्षस्य साध्यवदन्यत्वो पग्रह साध्याद्
रित्सापदाभ्यामसाध्यवत्त्वस्य पक्षवृत्तित्वन्यत्वाद्युपग्रह वह्निमद्धत्वरस्यपर्वतान्यत्वं नबाधइत्यलक्ष्मा
न्यपदे विशिष्टसाध्य इति गुण घटत्वपटत्वविशिष्टद्रव्यत्वादित्सादौ गुणादद्रव्यत्वाद्यभाववत्त्वमित्यर्थः
आदिभ्यां विशेषेस्यपक्षावृत्तित्वोपग्रहविशिष्टे साध्यपक्षस्यविशेषणाभाववत्त्वंतुनाभास नद्रूहस्या
यांविशिष्टपक्षज्ञानहेतोर्धर्मिणो विशेषणवत्तानिश्चयस्यैवनिरहेणविशिष्ट वत्ताज्ञानस्यैनाप्यायात

२९
२२

त्वतस्यास्य विरोधित्वादत एव साध्यविशिष्टहेतुमत्पक्षे साध्यग्रहं विना दुर्ग्रहमित्यादिकं स्वयमेव प्रागुक्तमिति ध्येयं
यथामते विरोधित्वं न्वयः तत्रानुभवबलादिन्नविषयकस्यापि ज्ञानस्य प्रतिबंधकत्वादुपात्तं निखिल
मेव साध्यवत्त्वादि विरोधि प्राञ्चस्समानविषयकस्यैव ज्ञानस्य लाघवेन विरोधित्वात् पक्षस्साध्यवान्
पक्षे साध्याभाववद्वेत्येतयोरेव वा। उक्तविरोधित्वमित्यपरे वस्तुतो यत्र पक्षापेक्षया साध्याभावो लघुस्तत्र
तत्प्रकारक एव बाधनिश्चयो विरोधि यथा चैत्रावालोकितहृदं वह्निमानित्यादौ तत्र पक्षप्रकारकनि
श्चयत्तापेक्षया साध्याभावं प्रकारकनिश्चयत्वस्यैव लघुत्वेन साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदक
त्वात् यत्र तु साध्यापेक्षया पक्ष एव लघुस्तत्र साध्याभावधार्मिकपक्षनिश्चय एव साध्यवत्ताज्ञानवि
रोधि यथा हृदश्चैत्रावलोकितवह्निमानित्यादौ तत्र साध्याभावनिश्चयत्वापेक्षया पक्षप्रकारकनि
श्चयत्वस्यैव लाघवेन विरोधितावच्छेदकत्वाद्यत्र तु पक्षसाध्याभावश्चाद्वयमेव तुल्यशरीरं तत्र साध्या

हेरंब

